श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीसदाशिवाभिनवनृसिंहभारती कृतम्

# ॥ श्री पद्मनाभस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री पद्मनाभस्तोत्रम् ॥

पद्मनाभ करुणामृतराशे
    सद्महेतुलवशून्यकृपायाः।
छद्महारितमहाबलिसम्पद्-
    विद्म एव तव वीर्यमनन्तम्॥ १ ॥

नाभ्याः सरस्त्वेन हि वर्णनं तु
    सत्यं तदा स्यात्किल पद्मनाभ।
यदा त्वदीयं विषयीकरोति
    नाभिं न चेद्याति कथं प्रमात्वम्॥ २ ॥

नाभीपद्मे पुत्रं
    वक्षसि कान्तां च सन्दधत्तान्तः।
स्वपिषि सदा किं विष्णो
    नम्रायास्मै द्रुतं ब्रूहि॥ ३ ॥

पापाब्धौ बडवानलस्य हि शिखा जाड्यान्धकारे रविः
    भाग्याब्धौ शरदिन्दुपङ्क्तिरमला त्वन्नामसङ्कीर्तनम्।
भक्तानां परिपोषणे च जननी स्वात्मावबोधे पिता
    कस्तस्माद्विमुखो भवेद्भुवि नरो नो चेन्महापापभाक्॥ ४ ॥

क्षीराम्भोनिधिराजमानफणिराण्मध्ये शयाना सदा
    लक्ष्मीपाणिपयोजमर्दितपदा कारुण्यवारान्निधिः।
कुर्वाणा मधुना च कैटभयुजा युद्धं च दोर्भ्यां मुहुः
    मुद्रा कापि च मुक्तिदानकुशला निद्राति जागर्ति वा॥ ५ ॥

पद्मनाभ तव पादसरोजा-
    सक्तचित्तमवनीपतिमेनम्।

www.prapatti.com

पाहि साश्रितसबन्धुसविट्ठल्-
    लोकमादरभरेण सराष्ट्रम्॥ ६॥

सामोदं प्रदिशन्तु वञ्चिकुलभूमूलर्क्षराजाय वाग्-
    देवीचन्द्रकलाधरेभवदनाः कारुण्यवाराशयः।
दीर्घायुर्दृढगात्रतामलयशांस्याचन्द्रतिग्मांशुभं
    धर्माध्वन्यधिकां प्रवृत्तिमचलामच्छिन्नसत्सन्ततिम्॥ ७॥

पायासुर्जगदम्बकेन्दुविलसच्छीर्षेभवक्त्राः सदा
    राज्ञ्यौ केरलदेशभाग्यलतिके कारुण्ययुग्भिर्मुदा।
दृग्भिः पादविनम्रसौख्यविततेः सम्पादिकाभिर्जवाद्-
    दत्त्वा सन्ततिमाशु सद्गुणयुतामारोग्यदीर्घायुषी॥ ८॥

मोचितः किं गजाधीश पद्मनाभेन सत्वरम्।
दृढभावनया तस्य पद्मनाभोऽभवद्गजेट्॥ ९॥

श्रीभूमिपाणिसरसीरुहसेविताङ्घ्रे
    श्रीवत्सकौस्तुभधर प्रणतार्तिहारिन्।
श्रीकण्ठमित्र दिननाथसुधांशुनेत्र
    श्रीपद्मनाभ मम देहि पदावलम्बम्॥ १०॥

नागेन्द्रभोगशयन प्रणतालिवाञ्छा-
    सम्पूरणामरतरो विधियोनिनाभे।
नाकाधिपादिपरिपूजितपादपद्म
    श्रीपद्मनाभ मम देहि करावलम्बम्॥ ११॥

कमलाकरपद्मपूजितं
    करुणादुग्धपयोधिमध्यगम्।
भुजगाधिपभोगशायिनं
    कलये कञ्चन देवसत्तमम्॥ १२॥

॥ इति श्री पद्मनाभस्तोत्रं सम्पूर्णम्॥

www.prapatti.com